योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३१

< योगवासिष्ठः | प्रकरणम् ५ (उपशमप्रकरणम्)

श्रीवसिष्ठ उवाच ।

अथ दुःखपरीतात्मा हरिणा हतदानवे ।

प्रह्लादश्चिन्तयामास मौनी पातालकोटरे ।। १

कोन्वस्माकमुपायः स्याद्य एवेहासुराङ्कुरः ।

तीक्ष्णाग्रो जायते तं तं भुङ्क्ते शाखामृगो हरिः ।। २

न कदाचन पाताले दैत्या दोर्दण्डशालिनः ।

स्थिरा बभूवुरुद्भिन्नाः पद्मा इव हिमाचले ।। ३

उत्पत्त्योत्पत्त्य नश्यन्ति भासुराकारघर्घराः ।

क्षीणप्रस्फुरितारम्भास्तरङ्गा इव वारिधेः ।। ४

सबाह्याभ्यन्तरं कष्टं समग्रालोकहारिणः ।

रिपवः प्रौढिमायाता अपूर्वतिमिरभ्रमाः ।। ५

तमःप्रपूर्णहृदयाः संकुचत्पत्रसंपदः ।

सुहृदः खेदमायान्ति निशीथकमलाकराः ।। ६

तातस्य मलिनैर्नूनं पादपीठोपमर्दकैः ।

सुरैर्विषय आक्रान्तो मृगैरिव महावनम् ।। ७

निरुद्यमा गतश्रीका दीनाः प्रकटिताशयाः ।

बान्धवा न विराजन्ते पद्माः प्लुष्टदला इव ।। ८

स्फुरन्त्यसुरवीराणां गृहेष्वविरतानिलैः ।

धूसरा भस्मनीहारा धूपधूमभरा इव ।। ९

हृतद्वारकपाटासु दैत्यान्तःपुरभित्तिषु ।

प्रभा मरकतस्येव जाता नवयवाङ्कुराः ।। १०

त्रिलोकीनाभिनलिनीमत्तेभा दानवा अपि ।

देववद्दैन्यमायाताः किमसाध्यमहो विधेः ।। ११

मनाक्चलति पर्णेऽपि दृष्टारिभयभीतयः ।
वध्वस्त्रस्यन्ति विध्वस्ता मृग्यो ग्रामगता इव ।। १२

आसुरीकर्णपूरार्थं फुल्ला रत्नगुलुच्छकाः ।
नरसिंहकरालूनाः स्थाणुतामागता द्रुमाः ।। १३

दिव्याम्बरलतापत्रा रत्नस्तबकदन्तुराः ।
पुनरारोपितास्तत्र नन्दने कल्पपादपाः ।। १४

पुरा त्वमरबन्दीनामसुरैः संस्तुतं मुखम् ।
अद्य त्वसुरबन्दीनां सुरैरालोकितं मुखम् ।। ५१

मन्ये दानमहानद्यः सुरेभकटभित्तिषु ।
प्रवृत्तास्ता भविष्यन्ति शैलसानुष्विवापगाः ।। १६

अस्माकमिभगण्डेषु दानदाहविभूतयः ।
लसन्ति मरुखण्डेषु संशुष्केष्विव धूलयः ।। १७

विकासिसितमन्दारमकरन्दारुणानिलाः ।
ते मेरुशिखरैस्तुल्या दैत्या दुर्लभतां गताः ।। १८

सुरगन्धर्वसुन्दर्यो दानवान्तःपुरोचिताः ।
अद्य मेरौ स्थितिं याता मञ्जर्य इव पादपे ।। १९

कष्टं तात पुरंध्रीणा शुष्काम्बुरुहनीरसाः ।
विलासाः सुरनारीभिर्भर्त्स्यन्ते लास्यलीलया ।। २०

पूर्वं यैरेव मत्तातश्चामरैरुपवीजितः ।
सहस्रनयनः स्वर्गे कष्टं तैरेव वीज्यते ।। २१

इयमस्माकमप्यापदागता दैन्यदायिनी ।
तस्यैकस्य प्रसादेन दुष्पौरुषगतेर्हरेः ।। २२

तद्दोर्वनघनच्छायालब्धविश्रान्तयः सुराः ।
न कदाचन तप्यन्ते हिमाद्रेरिव सानवः ।। २३

शौरिशौर्याग्रशिखरसंश्रयेणाश्रितश्रियः ।
अस्मान्समुपरुन्धन्ति शुनः शाखामृगा इव ।। २४

तेनासुरपुरन्ध्रीणां नित्यं मण्डनमण्डने ।
मुखपद्मे स्थितं बाष्पमब्जिनीनां हिमं यथा ।। २५
शीर्णभिन्नलुठद्भित्तिर्जगज्जरठमण्डपः ।
अयं नीलमणिस्तम्भैस्तद्भुजैरेव धार्यते ।। २६
स धर्ता सुरसैन्यस्य मज्जतो विपदर्णवे ।
क्षीरोदोदरमग्नस्य मन्दरस्येव कच्छपः ।। २७
एते तातादयः सर्वे तेनैवासुरसत्तमाः ।
पातिताः क्षुब्धकल्पान्तवातेनेव कुलाचलाः ।। २८
स एक एव संहारकर्मक्षमभुजानलः ।
सुरसार्थगुरुः श्रीमान्विषमो मधुसूदनः ।। २९
दैत्यदोर्दण्डपरशोस्तस्य वीर्येण वीर्यवान् ।
दानवान्बाधते शक्रो बालकानिव मर्कटः ।। ३०
दुर्जयः पुण्डरीकाक्षः प्रविमुक्तायुधोऽपि सन् ।
नासौ शस्त्रास्त्रविच्छेदैर्वज्रसारो विदीर्यते ।। ३१
अभ्यस्ता बहवस्तेन मिथः प्रेरितपर्वताः ।
भीमाः समरसंरम्भाः सममस्मत्पितामहः ।। ३२
तासु तास्वतिघोरासु विततास्वतिराजिषु ।
यो न भीत इदानीं स भयमेष्यति का कथा ।। ३३
उपायमेकमेवेमं हरेराक्रमणे स्फुटम् ।
मन्ये तद्व्यतिरेकेण विद्यते न प्रतिक्रिया ।। ३४
सर्वात्मना सर्वधिया सर्वसंरम्भरंहसा ।
स एव शरणं देवो गतिरस्तीह नान्यथा ।। ३५
न तस्मादधिकः कश्चिदस्ति लोकत्रयान्तरे ।
प्रलयस्थितिसर्गाणां हरिः कारणतां गतः ।। ३६
अस्मान्निमेषादारभ्य नारायणमजं सदा ।
संप्रपन्नोऽस्मि सर्वत्र नारायणमयो ह्यहम् ।। ३७

नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ।
नापैति मम हृत्कोशादाकाशादिव मारुतः ।। ३८
हरिराशा हरिर्व्योम हरिरुर्वी हरिर्जगत् ।
अहं हरिरमेयात्मा जातो विष्णुमयो ह्यहम् ।। ३९
अविष्णुः पूजयन्विष्णुं न पूजाफलभाग्भवेत् ।
विष्णुर्भूत्वा यजेद्विष्णुमयं विष्णुरहं स्थितः ।। ४०
हरिः प्रह्लादनामा यो मत्तो नान्यो हरिः पृथक् ।
इति निश्चयवानन्तर्व्यापकोऽहं च सर्वतः ।। ४१
अनन्तमिदमाकाशमापूर्य विनतासुतः ।
कनकाङ्गो ममाङ्गानामयमासनतां गतः ।। ४२
करशाखैकविश्रान्तसर्वहेतिविहंगमाः ।
नखांशुमञ्जरीकीर्णा महामरकतद्रुमाः ।। ४३
इमे ते मृदुमन्दारदामदिग्धांसमण्डलाः ।
मन्दराघृष्टकेयूराश्चत्वारो मम बाहवः ।। ४४
चलच्छशिकलापूरचारुचामरधारिणी ।.
इयं मे पार्श्वगा लक्ष्मीः क्षीरोदकुहरोत्थिता ।। ४५
हेलाविलुब्धभुवना त्रैलोक्यतरुमञ्जरी ।
इयं मे पार्श्वगा कीर्तिरचलामलभासिनी ।। ४६
अनारतजगज्जालनवनिर्माणकारिणी ।
इयं मे पार्श्वगा माया स्वेन्द्रजालविलासिनी ।। ४७
इयं सा हेलयाक्रान्तत्रैलोक्यतरुखण्डिका ।
जया स्फुरति मे पार्श्वे लता कल्पतरोरिव ।। ४८
इमौ मे नित्यशीतोष्णौ देवौ शीतांशुभास्करौ ।
प्रकटीकृतसंसारौ मुखमध्ये विलोचने ।। ४९
ममेयमुत्पलश्यामा पीनाम्भोधरसुन्दरी ।
श्यामीकृतककुप्चक्रा देहदीप्तिर्विसर्पिणी ।। ५०

अयं मम करे शङ्खः पाञ्चजन्यः स्फुरद्ध्वनिः ।
मूर्तं खमिव शब्दात्मा क्षीरोद इव संस्थितः ।। ५१
अयं मे कर्णिकाकोशनिलीनब्रह्मषट्पदः ।
पद्मः करतले श्रीमान्स्वनाडीकुहरोद्भवः ।। ५२
इयं मे रत्नचित्राङ्गी सुमेरुशिखरोपमा ।
हेमाङ्गदा गदा गुर्वी दैत्यदानवमर्दिनी ।। ५३
अयं मे भास्कराकार उद्यदंशुः सुदर्शनः ।
ज्वालाजटिलपर्यन्तपरिपाटलदिक्तटः ।। ५४
अयं मे केतुमद्वह्निसुन्दरो ज्वलितोऽसितः ।
कुठारो दैत्यवृक्षाणां नन्दयन्नन्दकः स्थितः ।। ५५
इदं मे शरधाराणां पुष्करावर्तकोपमम् ।
शार्ङ्गं धनुरहीन्द्राभमिन्द्रकार्मुकसुन्दरम् ।। ५६
इमान्यहमनन्तानि जगन्ति जठरे चिरम् ।
बिभर्मि जातनष्टानि वर्तमानान्यनेकशः ।। ५७
इमौ मही मे चरणाविदं मे गगनं शिरः ।
इदं वपुर्मे त्रिजगदिमे मे कुक्षयो दिशः ।। ५८
साक्षादयमहं विष्णुर्नीलमेघोदरद्युतिः ।
सुपर्णपर्वतारूढः शङ्खचक्रगदाधरः ।। ५९
एते मत्तः पलायन्ते समग्रा दुष्टचेतसः ।
तार्णास्तरलसंचाराः पवनादिव राशयः ।। ६०
अयं नीलोत्पलश्यामः पीतवासा गदाधरः ।
लक्ष्मीवान्गरुडारूढः स्वयमेवाहमच्युतः ।। ६१
को मामेति विरुद्धात्मा त्रैलोक्यदहनक्षमम् ।
स्वनाशाय ततः क्षुब्धं कालाग्निं शलभो यथा ।। ६२
इमे मे तैजसीं सृष्टिं ममाग्रस्थाः सुरासुराः ।
न शक्नुवन्ति संरोद्धुं चक्षुर्मन्दाः प्रभा इव ।। ६३

इमं मामीश्वरं विष्णुं ब्रह्मेन्द्राग्निहरादयः ।

स्तुवन्त्यनन्तया वाचा बहुवक्त्रसमुत्थया ।। ६४

अयं विजृम्भितैश्वर्यो जातोऽहमजिताकृतिः ।

सर्वद्वन्द्वपदातीतो महिम्ना परमेण हि ।। ६५

त्रिभुवनभवनोदरैकमूर्तिं प्रसभविभिन्नसमस्तदुष्टसत्त्वम् ।

घनगिरितृणकाननान्तरस्थं सकलभयापहरं वपुः प्रणौमि ।। ६६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० उपशमप्रकरणे प्रह्लादनिर्वाणे नारायणीकरणं नामैकत्रिंशः सर्गः ।। ३१ ।।